नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **25**
No. of Printed Pages – **3**

# VU-90-Jyotish Shastra

## ज्योतिष शास्त्रम्

**वरिष्ठ उपाध्याय परीक्षा, 2020**

**समय : 3¼ घण्टे**

**पूर्णांक : 56**

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

1. संख्यामाधारीकृत्य लिखितं ग्रन्थं किम् ? ½

2. "कृतिः स्वर्णयोः" इत्यत्र "कृतिः" इत्यनेन किं ज्ञायते ? ½

3. कानि केन्द्रस्थानानि ? ½

4. मेषवृश्चिकयोर्स्वामी कः ? ½

5. एकस्मिन् नक्षत्रे कति चरणानि भवन्ति ? ½

6. विंशोत्तरी महादशायां कति वर्षाणि भवन्ति ? **1**

7. रूपाष्टकं रूपचतुष्टयेन धनं धनेन भक्तं किं स्यात् ? **1**

8. शकुनवशात् यात्राफलं लेखनीयम् । **1½**

9. यात्रायाम् सर्वशुद्धनक्षत्राणि लेखनीयानि । **1½**

10. देहादि द्वादशभावानि सकुण्डलीकं लिखत । **1½**

11. यात्रायाम् सर्वाङ्गसाधनप्रकारं वर्णनीयम् । **2½**

12. "पूर्वं प्रोक्तं व्यक्त ........" एतत् श्लोकं प्रपूरणीयम् । **2½**

13. यत्र गुण्यः अ + 2क + 3ग गुणकः अ – 2क + 5ग तत्र गुणनजं फलं किम् ? **2½**

14. 5 – 3 + 10 – 5 × 3 = _______ ? गणित क्रिया विधेया । **2½**

15. यत्र सूर्योदयः 06/49 सूर्यास्तश्च 05/33 तत्र दिनरात्रिमानम् आनयत । **2½**

16. रूपैः षड्भिर्वर्जितानां चतुर्णामव्यक्तानां वर्गं ब्रूहि । **2½**

17. करणानि कति भवन्ति ? नामानि लेखनीयानि । **2½**

18. कानि षड्वर्गाणि ? लेखनीयानि । **2½**

19. यात्रा कदा प्रशस्ता ? "धनुर्मेषसिंहेषु ........" एतत् श्लोकं प्रपूर्य्य अस्याशयो लेख्यः । **2½**

20. के दिगीशाः ? किञ्च तेषां प्रयोजनम् ? **2½**

21. शतं हृतं येन युतं नवत्या – विवर्जितं वा विहृतं त्रिषष्टया । **4**

निरग्रकं स्याद् वद मे गुणं तं स्पष्टं पटीयान् यदि कुट्टकेऽसि ।।

**अथवा**

यत्र भाज्य : 221 हारः 195 क्षेपः 65 तत्र गुणकः प्रसाध्यः ।

22. अष्टादशहताः केन – दशाढ्या वा दशोनिताः । **4**

शुद्धं भागं प्रयच्छन्ति–क्षयगैकादशोद्धृताः ।।

**अथवा**

यत्र भाज्यः 5 हारः 3 क्षेपकः 23 तत्र गुणकं स्पष्टयत ।

23. कुण्डल्याम् षड्वर्गेषु नवमांशसाधनं सचक्रं ससूत्रञ्च स्फुटी कुरुत । **4**

**अथवा**

सपादनक्षत्राणि लेखनीयानि ।

24. गृहारंभे राशिवशान्निषिद्ध स्थानानि सश्लोकं सप्रमाणञ्च लेखनीयम् । **5**

**अथवा**

गृहारंभे कालशुद्धिविचारं प्रमाणोपेतं सश्लोकञ्च स्पष्टयत ।

**अथवा**

देवालयादिनिर्माणे राहुमुखज्ञानम् श्लोकसहितं वर्णनीयम् ।

25. अपूर्वगृहप्रवेशमुहूर्त्तः सप्रमाणं सश्लोकञ्च लेख्यः । **5**

**अथवा**

वामोरविर्मृत्युसुतार्थ......" एतत् श्लोकं प्रपूर्य्य अस्याशयोः प्रस्फुटी कुरुत ।

**अथवा**

यत्र सूर्योदयः 06/55 जन्म समयः प्रातः 10/58 जन्मर्क्षं पूर्वाफाल्गुनी 28/55 गतर्क्षञ्च मघा 32/55 तत्र इष्टकालं प्रसाध्य सश्लोकं ससूत्रञ्च भयात–भभोगयोः साधनं कुरुत ।

---

DO NOT WRITE ANYTHING HERE